# २६ षड्विंश दशकः - सुरथ कथा

राजा पुराऽऽसीत् सुरथाभिधानः स्वारोचिषे चैत्रकुलावतंसः ।
मन्वन्तरे सत्यरतो वदान्यः सम्यक्प्रजा पालन मात्रनिष्ठः ॥ २६-१॥

वीरोऽपि दैवात्समरे स कोला-विध्वंसिभिः शत्रुबलैर्जितः सन् ।
त्यक्त्वा स्वराज्यं वनमेत्य शान्तं सुमेधसं प्राप मुनिं शरण्यम् ॥ २६-२॥

तपोवनं निर्भय मावसन्द्रु-च्छायाश्रितः शीतलवातपृक्तः ।
स एकदा राज्यगृहादि चिन्ता पर्याकुलः कञ्चि दपश्यदार्तम् ॥ २६-३॥

राजा तमूचे सुरथोऽस्मि नाम्ना जितोऽरिभि र्भ्रष्ट विभूति जालः ।
गृहादि चिन्ता मथितान्तरङ्गः कुतोऽसि कस्त्वं वद मां समस्तम् ॥ २६-४॥

श्रुत्वेति स प्रत्य वदत्समाधि नामाऽस्मि वैश्यो हृत सर्ववित्तः ।
पत्नी सुताद्यैः स्वगृहान्निरस्तः तथाऽपि सोत्कण्ठ मिमान् स्मरामि ॥ २६-५॥

अनेन साकं सुरथो विनीतो मुनिं प्रणम्याह समधि नामा ।
गृहान्निरस्तोऽपि गृहादि चिन्तां करोति सोत्कण्ठ मयं महर्षे ॥ २६-६॥

ब्रह्मैव सत्यं परमद्वितीयं मिथ्या जगत्सर्व मिदं च जाने ।
तथाऽपि मां बाधत एव राज्यगृहादि चिन्ता वद तस्य हेतुम् ॥ २६-७॥

ऊचे तपस्वी शृणु भूप माया सर्वस्य हेतुः सगुणाऽगुणा सा ।
बन्धं च मोक्षं च करोति सैव सर्वेऽपि मायावशगा भवन्ति ॥ २६-८॥

ज्ञानं हरेरस्ति विधेश्च किन्तु क्वचित्कदाचिन्मिलितौ मिथस्तौ ।
विमोहितौ कस्त्वमरे नु कस्त्वं एवं विवादं किल चक्रतुः स्म ॥ २६-९॥

ज्ञानं द्विधैकं त्वपरोक्ष मन्यत् परोक्ष मप्येत दवेहि राजन् ।
आद्यं महेश्याः कृपया विरक्त्या भक्त्या महत्सङ्गमतश्च लभ्यम् ॥ २६-१०॥

य एत दाप्नोति स सर्वमुक्तः द्वेषश्च रागश्च न तस्य भूप ।
ज्ञानं द्वितीयं खलु शास्त्रवाक्य विचारतो बुद्धिमतैव लभ्यम् ॥ २६-११॥

शमादि हीनो न च शास्त्र वाक्य - विचार मात्रेण विमुक्ति मेति ।
देव्याः कटाक्षैर्लभते च भुक्तिं मुक्तिं च सा केवल भक्ति गम्या ॥ २६-१२॥

सम्पूज्य तां साकमनेन दुर्गां कृत्वा प्रसन्नां स्वहितं लभस्व ।
श्रुत्वा मुनेर्वाक्य मुभौ महेशि त्वां पूजयामास तुरिद्धभक्त्या ॥ २६-१३॥

वर्ष द्वयान्ते भवतीं समीक्ष्य स्वप्ने सतोषा वपि तावतृप्तौ ।
दिदृक्षया जाग्रति चापि भक्तौ आचेरतुर्द्वौ कठिन व्रतानि ॥ २६-१४॥

वर्ष त्रयान्ते सुमुखीं प्रसन्नां त्वां वीक्ष्य तौ तुष्टुवतुः प्रहृष्टौ ।
दैवात्समाधि स्त्वदनुग्रहेण लब्ध्वा परं ज्ञान मवाप मुक्तिम् ॥ २६-१५॥

भोगाविरक्तः सुरथस्तु शीघ्रं निष्कण्टकं राज्य मवाप भूयः ।
मन्वन्तरे भूपति रष्टमे स सावर्णि नामा च मनुर्बभूव ॥ २६-१६॥

त्वं भुक्ति कामाय ददासि भोगं मुमुक्षवे संसृति मोचनं च ।

किञ्चिन्न पृच्छामि परं विमूढो नमामि ते पादसरोज युग्मम् ॥ २६-१७॥